Shri Raghunatha Temple MSS. Library,
JAMMU

No. 1014-घ

Title साधनपंचकाख्यं श्लोकपंचकम् सटीकम्

Author भूधरः

Extent ६ Age

Subject वेदान्तशास्त्रम् . सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० १०१४-घ

साधनपंचकाख्यं श्लोकपंचकं सटीकम्

नं० २०१५-घ ६ पत्रे

पत्राणि ६ (सम्पूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० १०१४ – घ

(वेदान्तशास्त्रम्) साधनपंचकाख्यं श्लोकपंचकं सटीकम्

पत्राणि ६ (सम्पूर्णम्)

कर्त्ता भूधरः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशायनमः ॐकारंध्वनयंतंसुखंस्वात्मयंतंहसंतंस्वते
जोभिभूतारिगर्वं स्वभक्तेष्टदातारमाद्यंसुराणांगणेशान।
मीशानसूनुंनमामि श्रीशंकराचार्यविनिर्मितस्यकरोम्य
हंसाधनपंचकस्य टीकांमनोज्ञांबुधमोदबीजांसद्भक्तियु
क्तांकिलभूधराख्यः इहखलुपरमकारुणिकोभगवान्स
कललोकाहितायतारोभवभयनिचयदुस्तरसमुद्रनिजसू
क्तितरणितारणैकयत्नकोद्राविडवंशरत्नाकरचंद्रमा श्रीम
च्छंकराचार्यःस्वदेहमुक्तिसमक्षःशिष्यान्प्रत्युपदिशति वेदो
नित्यमधीयतामित्यादिभिःपंचभिःश्लोकैः वेदोनित्यमधी
यतांतदुदितंकर्मस्वनुष्ठीयतांतेनेशस्यविधीयतामपचितिःका
म्येमतिस्त्यज्यतां पापौघःपरिधूयतांभवसुखेदोषोनुसंधी १
यतामात्मेच्छाव्यवसीयतांनिजगृहात्तूर्णंविनिर्गम्यतां १ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अस्यार्थः भोश्शिष्या वेदो नित्यमधीयतां पठ्यतां ननु कदाक
दा कर्तव्य तत्राह नित्यं सर्वदा न नु कदाचित् कदाचित् वेदविदः
प्रशंसामनुनोक्ता वेदश्चास्यार्थे तस्य ज्ञो यत्र तत्राश्रममेव सन्
इहैव लोके तिष्ठन् स ब्रह्मलोकाय कल्प्यते इति न केवलं वेदप
ठनं क्रियतां किं तु भोश्शिष्यास्तदुदितं वेदप्रणीतं कर्म संध्यादि
कं स्वनुष्ठीयतां सम्यक् श्रद्धापुरःसरं क्रियतां भोश्शिष्याः का
म्यमतिस्त्यज्यतां काम्यं कर्म न क्रियतामित्यर्थः ननु काम्यक
र्मत्यागः कथं भवेत्तत्राह भोश्शिष्या भवसुखे दोषो नुसंधीय
तां भवः संसारस्तत्र यत्सुखं तत्र दोषो नित्यसातिशयत्वादिरू
पो नुसंधीयतामनुचिंत्यतां काम्यदोष दर्शने सति विषयका
मनाया अभावात् काम्यकर्मत्यागो भवत्येव तर्हि किं करणीयं
तत्राह तेनेशास्याविधीयतामपचितिः भोश्शिष्यास्तेन कर्मणा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ईश्वरस्य ब्रह्मणोपपत्तिः पूजां क्रियतां सर्वाणि कर्माणि ब्रह्मण्ये
वार्प्यतामिति भावः नत्वेवं किं जायते तत्राह पापौघः परिधू
यतां निष्कामकर्मणा पापक्षयः क्रियतामित्यर्थः तथा च भग
वद्गीतायामर्जुनं प्रति भगवता वर्णितेन येव कर्मणां करण
मुपदिष्टं कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्म
फलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि इत्यादिवचोभिः पद्यैः एवं सति
किं जायते तत्राह भो शिष्या आत्मेच्छाव्यवसाय क्रियतां पुनः
किं कर्तव्यमत आह भो शिष्या आत्मेच्छाव्यवसाये सति नि
जगृहात्तूर्णं शीघ्रं विनिर्गम्यतां विलंबो न क्रियतामित्यर्थः
यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतेः १ संगः सत्सु वि
धीयतां भगवतो भक्तिर्दृढा धीयतां शान्त्यादिः परिचीयतां दृ
ढतरं कर्माशु संत्यज्यतां सद्विद्वानुपसर्प्यतां प्रतिदिनं तत्पादु 2

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कोसेव्यतांब्रह्मैकाक्षरमर्णानांमातिशिरोवाक्यंसमुत्कर्ण्यतां
२ भोशिष्याःसंगःसंगतिःसत्सुसाधुषुविधीयतांक्रियतांभ
क्तेहरेणसत्संगतिप्रशंसालक्षणानाअंघ्रिपोहरतिसिंचतिवा
चिसत्यंमनोनतिंविशतिपापमयाकरोतिचेतःप्रसादयतिदि
क्षुतनोतिकीर्त्तिसत्संगतिःकथयकिंनकरोतिपुंसां १ सत्ये
साध्यौविद्यमानेप्रशस्तेभ्यर्हितेपिसदित्यमरःविपूर्वसाधून्
करोत्यर्थत्वाद्विधीयतामित्यस्यक्रियतामित्यर्थःतथाचोक्तंवि
पूर्वौधाकरोत्यर्थे अभिपूर्वौस्तभाषणेसंपूर्वौमेलनेप्रोक्तौ।
निपूर्वःस्थापनेमतइति।भोशिष्याभगवतोनिखिलैश्वर्यसं
पन्नस्यभक्तिर्दृढाअव्यभिचारिणीधीयतांधार्यतांऐश्वर्य।
स्यसमग्रस्यधर्मस्ययशसःश्रियःज्ञानवैराग्ययोश्चैवषण्णां
भगइतिंगना १ उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं वेत्ति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विद्यामविद्यांचसवाध्योभगवानिति भगंकीर्तिरस्यास्तीति
भगवान् भगोस्त्रीकाममाहात्म्यवीर्ययोन्यर्ककीर्तिषुविस्मय
3 रः भोशिष्याः शांत्यादीपरिचीयतां शांत्यादीनांपरिचयः क्रि
यतां आदिशब्देन दमनउपरतितितिक्षाश्रद्धासमाधानाख्या
पंचगृह्यंते एषां लक्षणानियथा सदैववासनात्यागः शमो
यमितिशब्दितः निग्रहो वाह्यवृत्तीनांदमइत्यभिधीयते विष
येभ्यःपरावृत्तिः परमोपतिर्हिंसासहनंसर्वदुखानांतितिक्षासा
शुभामता निगमाचार्यवाक्येषुभक्तिःश्रद्धेतिविश्रुता चित्ते
काग्र्यंतुसंल्लक्ष्येसमाधानमितिस्मृतं ३ भोशिष्याइदंतरंक
र्मामुसंत्यज्यतां इदंतरंआसक्तिविशिष्टंफललिप्सासंयुतंकर्मा
मुत्रीघ्रंसंत्यज्यतां भोशिष्यासद्विद्याउपसर्प्यतां सद्विद्यावेदां
तशास्त्रवेत्तारउपसर्प्यतामुपास्यतां भोशिष्यातत्पादुकेसेव्य ३.

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तं भोश्शिष्याएकाक्षरंब्रह्मओंकाररूपं अर्थ्यतां भोश्शिष्याश्रु
तिशिरोवाक्यं समुत्कर्ण्यतां वेदांतवाक्यंश्रूयतामित्यर्थः २॥
वाक्यार्थश्चविचार्यतां श्रुतिशिरःपक्षःसमाश्रीयतां दुस्तर्को।
त्सुविरम्यतां श्रुतिमतस्तर्कोनुसंधीयतां ब्रह्मैवास्मिविभाव्यतां
महरहर्गर्वःपरित्यज्यतां देहेहंमतिरुज्झ्यतां बुधजनैर्वादःपरित्यज्य
तां ३, भोश्शिष्यावाक्यार्थः विचार्यतां भोश्शिष्याश्रुतिशिरःपक्षः
समाश्रीयतां भोश्शिष्यादुस्तर्कात्सु विरम्यतांविरामःक्रियतामि
त्यर्थः भोश्शिष्याःश्रुतिमतस्तर्कोनुसंधीयतां श्रुतिर्वेदवाक्यंत
द्वान् श्रुतिमान् तस्यश्रुतिमतस्तर्कोनुसंधीयतामनुचिंत्यतां भो
श्शिष्याश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांपूर्वपूर्वब
लीयस्त्वमितिजैमिनिसूत्राच्छ्रुतेर्बलीयस्त्वंश्रुतेः भोश्शिष्याअ
हरहः प्रतिदिनंब्रह्माहमस्मीतिविभाव्यतां भोश्शिष्याःगर्वःपरि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्यज्यतां भो शिष्याः देहेहंमतिरुज्झ्यतां देह एवाहमस्मि स्वहंकार
4 स्त्यज्यतां भो शिष्या बुधजनैर्विद्वज्जनैर्वादः परित्यज्यतां ३॥
क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां स्वाद्व
न्नं न तु याच्यतां विधिवशात्प्राप्तेनैव संतुष्यतां शीतोष्णादि विष
ह्यतां न तु वृथा वाक्यं समुच्चार्यतां औदासीन्यमभीप्स्यतां जन
कृपानैष्ठुर्यमुत्सृज्यतां ४ भो शिष्याः क्षुद्व्याधिश्चिकित्स्यतां
क्षुद्रूपाया व्याधेश्चिकित्सा क्रियतां ननु केनौषधेन चिकित्सा
कर्तव्या तत्राह भो शिष्या भिक्षौषधं भुज्यतां भिक्षारूपेणौष
धेन क्षुद्व्याध्यपनयः क्रियतामिति भावः भो शिष्याः स्वाद्वन्नं न
तु याच्यतां स्वाद्वन्नमेवान्नव्यामिति यत्नो न क्रियतां तर्हि किं कर्त
व्यमतआह भो शिष्या विधिवशात्प्राप्तेन संतुष्यतां यद्दैववशा
त्प्राप्तं तेनैव संतोषः करणीयः भो शिष्याः शीतोष्णादि विसह्य ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तां इदमेव भगवद्गीतायामर्जुनं प्रति भगवतोपदिष्टं मात्रास्प
र्शास्तु कौन्तेय शीतोष्ण सुखदुःखदाः आगमापायिनोऽनित्या।
स्तांस्तितिक्षस्व भारतेत्यादिना भोश्शिष्याः यथावा कंचनानुसमु
च्चार्यतां भोश्शिष्या औदासीन्यमभीप्स्यतां भोश्शिष्या जनकृपा
नैष्ठुर्यं समुत्सृज्यतां जनेषु कृपानैष्ठुर्यं मुत्सृज्यतां जनेषु कृपा
क्रियतामित्यर्थः ४ एकान्ते सुखमास्यतां परतरे चेतः समाधी
यतां पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यतां प्राक्कर्म प्र
विलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां प्रारब्धं त्विह भुज्यतामथ
थ परब्रह्मात्मना स्थीयतां ५ भोश्शिष्याः पूर्णात्मा सुसमीक्ष्यतां
सर्वत्रात्मैव परिपूर्णोस्थितइति ज्ञाप्यतां ननु जगतो द्वितीयतया
प्रत्यक्षोपलंभात्कथं पूर्णात्मा दर्शनं संभवतीति तत्राह जगदिदं त
द्बाधितं दृश्यतां इदमः प्रत्यक्षगतसमीपतरवर्त्ति चैतदो रूपं अ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दसस्तु विप्रकृष्टत्वादिति परोक्षे विजानीयादिति ननु कुत्र स्थित्वा पू
र्णात्मानं पश्यामस्तत्राह भो शिष्या एकांते सुखमास्यतां एकांते
जनसंचाररहिते प्रदेशे सुखं यथा भवति तथास्यतां स्थीयतां तत्र
स्थित्वा भो शिष्याः परतरे ब्रह्मणि चेतः समाधीयतां समाधिस्थं
मनः क्रियतामिति भावः इदमेव भगवतार्जुनं प्रत्युक्तं गीतायां ष
ष्ठेध्याये योगी युंजीत सततमात्मानं रहसि स्थितः एकाकी यत
चित्तात्मा निराशीरपरिग्रहः १ योगफलं चोक्तं युंजन्नेवं सदा
त्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधि
गच्छति २ भो शिष्याश्चितिबलात् ज्ञानबलात् प्राक्कर्म पूर्वजन्मा
र्जितं कर्म प्रविलाप्यतां उत्तरेपि कर्मणि न श्लिष्यतां तदधिगमे
उत्तरपूर्वयोरश्लेषविनाशौ चितिशारीरकसूत्रमत्र प्रमाणं भो
शिष्या इह जगति प्रारब्धं कर्म भुज्यतां भोगाद्युते कर्मणो थिना

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्रा भावात् तदुक्तं नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि भोक्त

व्या अथ प्रारब्धभोगादनंतरं परब्रह्मात्मना स्थीयतां तथा च श्रुतिः

तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति ५ यः श्लोक

पंचकमिमं पठते मनुष्यः संचिंतयत्यनुदिनं स्थिरतामुपेत्य तस्या

शु संसृति वनानलतीव्र घोरतापप्रशांतिमुपयाति चितिप्रसादात्

अधुनैतत् श्लोकपंचकपठने फलं दर्शयति यः मनुष्यः इमं श्लोक

पंचकमनुदिनं स्थिरतामुपेत्य संचिंतयति तस्याशु तीव्रं संसृति

दावानलतीव्रघोरतापश्चितिप्रसादात्प्रशांतिमुपयातीत्यन्वयः

इति श्रीमच्छंकराचार्यविरचितं साधनपंचकटीका समाप्ता ॥

पंचसूनाकृतं पापं पंचयज्ञैः व्यपोहति पाठो होमश्चातिथीनाम

पर्यणं तर्पणं बलिः एते पंचमहायज्ञा ब्रह्मयज्ञादिनामकाः॥ ॥ ६

ब्रह्मयज्ञः देवयज्ञः नृपयज्ञः पितृयज्ञः भूतयज्ञः॥ शुभं भवतु॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

6

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative